ब्रह्माद्वैतवादियों द्वारा कल्पित ब्रह्म और अविद्या न तो स्वतः प्रतीत होते हैं, अन्यथा विवाद ही न होता, और न प्रत्यक्षादि अन्य प्रमाणोंसे; क्योंकि द्वैतकी सिद्धिका प्रसंग आता है। दूसरे, भेदको मिथ्या और अभेदको सम्यक् बतलाना युक्तिसंगत नहीं है। कारण, भेद और अभेद दोनों रूप ही वस्तु प्रमाणसे प्रतीत होती है। अतः ब्रह्मवाद ग्राह्य नहीं है।

अन्तिम उपलब्ध खण्डित प्रकरण

शंका—भेद और अभेद दोनों परस्पर विरुद्ध होनेसे वे दोनों एक जगह नहीं बन सकते हैं, अतः उनका प्रतिपादक स्याद्वाद भी ग्राह्य नहीं है?

समाधान—नहीं, क्योंकि भिन्न भिन्न अपेक्षाओंसे वे दोनों एक जगह प्रतिपादित हैं–पर्यायोंकी अपेक्षा भेद और द्रव्यकी अपेक्षा अभेद बतलाया गया है और इस तरह उनमे कोई विरोध नहीं है। एक ही रूपादिक्षणको जैसे बौद्ध पूर्व क्षणकी अपेक्षा कारण और उत्तर क्षणकी अपेक्षा कार्य दोनों स्वीकार करते हैं और इसमे वे कोई विरोध नहीं मानते। उसी तरह प्रकृतमे भी समझना चाहिए। अन्यापोहकृत उक्त भेद माननेसे सांकर्यादि दोष आते हैं। अत. स्याद्वाद वस्तुका सम्यक् व्यवस्थापक होनेसे सभीके द्वारा उपादेय एवं आदरणीय है।

— —

विषय-सूची

विषय	कारिका

विषय — कारिका

(शेषांश पृ० २६ पर देखिए)

परोक्त्यैवाऽनुमेष्टा चेत्, स्वोक्त्या सा नेष्यतः(ष्टता) कुतः ?
व्यभिचारेण तन्नेष्या, नाऽध्यक्षं चाविशेषतः ॥७॥
निर्बाधं तत्प्रमाणं चेत्, अनुमाऽप्यस्तु तादृशी।
पितामहानुमानं हि निर्बाधत्वेन सम्मतम् ॥८॥
धर्मादि-कार्य-सिद्धेश्च तत्कर्त्ताऽऽत्माऽपि सिद्ध्यति।
[कार्यं हि] कर्तृ-सापेक्षं तद्धर्मादि सुखावहम् ॥९॥
'तत्कर्ताऽऽत्माऽस्ति, सौख्यादेरन्यथानुपपत्तितः।'
इत्यर्थापत्तितः सिद्ध्येत्स आत्मा परलोक-भाक् ॥१०॥
न हि सौख्यादिकार्यस्य धर्मादेरिह दर्शनम्।
तत्तत्कर्त्ता भवेत्प्राक् च पश्चाच्चेत्तस्य नित्यता ॥११॥
तत्त्वान्तरं सदा चित्, सु-सदहेतुक-भावतः।
पृ[थिव्यादिभ्य इ]त्येवमनुमाऽप्यस्य साधनम् ॥१२॥
चिदस्तित्वे विवादो न चार्वाकस्याऽपि, तेन च।
भूत-संहति-कार्यस्य ज्ञानरूपस्य कल्पनात् ॥१३॥
नेयं कायस्य कार्यं स्यादात्मज्ञेनाऽप्यतद्ग्रहात्।
गृह्यते हि घटादिकैर्विकार्यपि मृदादिकम् ॥१४॥
स्वसंवेदनात्तज्जाभ्यां हि नीय[मानत्वमे]नयोः।
प्रतीति-भिन्न-मानाभ्यां नैवं कारण कार्ययोः ॥१५॥
भूतसंहति कार्यत्वं तन्न ज्ञानात्मकाऽऽत्मनः।
इत्यहेतुकता-सिद्धेर्हेतोर्नासिद्धिदूषणम् ॥१६॥
अविनाभाविताऽप्यस्य व्यभिचाराद्यभावतः।
कादाचित्कं न दृष्टं हि किञ्चिच्च सदहेतुकम् ॥१७॥
ज्ञानं [कायस्वभाव] स्यात्तन्न तत्त्वान्तरं ततः।
प्रतिज्ञार्थैकदेशः (शोऽ)स्यात्सि (सि)द्धिरित्यपि दुर्मतम् ॥१८॥

कृ[तस्य कर्त्रा धर्म]स्य कर्त्रा लब्धं हि नापरैः ।
अस्मिन्मृतेऽन्यलब्ध तु तेन लब्ध कथं भवेत् ॥४॥

पुत्रादिलब्धं तल्लब्धमिति वागेव नार्थवत् ।
अन्यथा पुत्रभुक्त्येव भुक्तवानस्तु तत्पिता ॥५॥

व्यवहारेण सवृत्या वा लब्धं तेन चेन्मतम् ।
संवृति-व्यवहाराभ्यां को नामा[र्थो विवक्षि]तः ॥६॥

धर्मकर्त्रा फलं लब्धमित्यर्थः किं विवक्षितः ।
नैवेत्यर्थोऽथवा लब्धं कथञ्चिदिति वा भवेत् ॥७॥

पूर्वपक्ष-द्वयेऽप्युक्त दूषण, स्व-मत-क्षयात् ।
नेष्टस्तृतीयपक्षोऽपि, तयोरर्थोऽपि नापरः ॥८॥

किञ्च, कर्त्रा फलं लब्ध न वा किमिति [कथ्यताम्] ।
[अ]प्राह्यः फलमस्तीति वाद्यप्रस्तुतसाधनात् ॥९॥

नास्ति कर्त्रेति चेत्कर्तुः फलाभावोऽभिसम्मतः ।
फलाभावेऽपि धर्मोक्तेः सम्मता च स्ववञ्चना ॥१०॥

एकत्व-विभ्रमाद्देही कर्तुरेव फलं वदेत् ।
नैवं योगीति चेदेवमपि स्यात्सोऽपि वञ्चकः ॥११॥

[न धर्मे] एक एवायं तत्फली च तदा वदेत् ।
धर्मोऽकार्यः फलाभावात् कर्तुरित्येव नान्यथा ॥१२॥

किञ्चात्र फलसद्भावात्कर्त्रा लब्धं फल यदि ।
अप्य(न्य)संसार(रि)मात्रेण मुक्तस्याप्यस्तु संवृतिः (तेः) ॥ ३॥

यत्कार्यं येन सञ्जातं फलं तस्यैव तत्ततः ।
संसार(रि)[जना] नामेव फलं मुक्तस्य नेत्यसत् ॥१४॥

फलकृत्वेऽपि तत्कर्त्रा न तु लब्धं हि तत्फलम् ।
तदापि लब्धमित्युक्तौ मुक्तेनापीति कथ्यताम् ॥१५॥

क्वचि[द्वासना-सद्भावे क] चित्तज्ज्ञानसम्भवः ।
तत्सम्भवे क्वचिद्भावो वासनाया इति स्फुटम् ॥२८॥
वासनाता (नातो) न तज्ज्ञानं सन्तानादिति चेन्न न ।
तज्ज्ञाने हि क्वचिज्जाते सन्तानस्तत्र तत्क्वचित् ॥२९॥
तज्ज्ञानस्य क्वचिद् दृष्टे नान्योन्याश्रयदूषणम् ।
इति चेद् दृष्टमिष्टं [हि चान्योन्याश्रय]दूषणम् ॥३०॥
वीजाङ्कुरादिवत्सः स्यात्प्रवन्धोऽनादिरित्यसत् ।
स्याद्भेदोऽत्र चास्तीति न दृष्टान्तोऽन्यवादिनाम् ॥३१॥
कार्य-कारण-मात्रेण सन्तानस्य प्रकल्पनम् ।
जनकात्मजयोश्च स्याद्बुद्ध-संसारिणोरपि ॥३२॥
कार्ये कारणरूपत्वमस्त्येव हि तयोरपि ।
देहिनां बुद्धवेदित्वात्ते कार्यं स हि कारणम् ॥३३॥
विपयोऽकारण नेति बौद्धानां ह्याभिवाञ्छितः ।
सादृश्यादेरसत्त्वं चेद्दत्तमत्र सदुत्तरम् ॥३४॥
यथैकार्थक्रिया-हेतुः सन्तानस्तौ तथा न चेत् ।
तयोः सन्तानतायां किं तत्क्रियाऽत्र न सम्भवेत् ॥३५॥
कार्य-कारण-रूपत्वेऽप्यनयोः सन्ततिर्न चेत् ।
सन्तानाभाव एव स्यान्निमित्तान्तर-हानितः ॥३६॥
सन्तानत्व-निमित्तं हि कार्य कारण-मात्रकम् ।
तस्मिन्नपि न तत्त्व चेत्तत्किमन्यत्र सम्भवेत् ॥३७॥
स्याद्धि लक्षणयुक्तेऽपि बाधे लक्षणदूषणम् ।
तन्न स्यात्सन्ततिः क्वापि भेद-नाशित्व-साम्यतः ॥३८॥
तस्यां चेत्तदसाम्यं स्याद्भवेत्स्यान्नाशि-भिन्नता ।
न हि स्वस्य स्वतोऽसाम्यं साम्यासाम्यं हि भेदिनोः ॥३९॥

नाध्यक्षमिह युक्तिः स्याद्वस्तुन्येवाऽस्य[1] सम्भवात् ।
अवस्तुन्यप्यपोहे चेत्कल्पनात्वान्न तत्प्रमा ॥ ५ ॥

विकल्पापोहसामान्यगृहीतावासनोद्भवः ।
वस्तुन्यभेदसादृश्यकल्पनात्मेति पोषणात ॥ ६ ॥

युक्तिश्चेदनुमानो (माऽन्यो)ऽन्यसंश्रयः सा हि सिद्ध्यति ।
अपोहसिद्धसाध्यादिधर्मभेदं तथैव सः ॥ ७ ॥

विकल्पो नाऽत्र युक्तिः स्याद्बाह्ये सत्येव न ह्ययम् ।
वर्तते यदि वर्तेत किं न प्रत्ययवत्प्रमा ॥ ८ ॥

बाह्यत्व-विद्यमानत्वव्यतिरिक्तान्वितत्वतः ।
व्यतिरिक्तेऽपि तद्रूपविदेव हि विकल्पधीः ॥ ९ ॥

तया सिद्धादपोहाच्च धर्मभेदो न वस्तुषु ।
तस्य वस्तुष्वसद्भावात्कल्पनारोपितात्मनः ॥ १० ॥

एकत्वाध्यवसायाच्चेदस्तु वस्तुषु सम्भवः ।
नैकत्वस्याऽप्यसद्भावात्तेष्वारोपितरूपिणः ॥ ११ ॥

तस्याऽप्येकत्व-निर्णीतेरन्यतस्तत्र सम्भवे ।
अनवस्था ततो युक्तिरपोहेन विकल्पधीः ॥ १२ ॥

किञ्चैकत्वसमारोपाद्धर्मभेदेऽपि वास्तवे ।
किन्नारोपितवह्नित्वाद्दाहो माणवकादपि ॥ १३ ॥

किञ्च प्रत्यक्षमन्यद्वा नैकत्वाध्यवसायकृत् ।
सत्येतरार्थयोर्वृत्ति· प्रत्यक्षादेर्न हीष्यते ॥ १४ ॥

प्रत्यक्षं खलु सत्ये स्यादसत्येऽर्थेऽनुमादिकम् ।
न चैकार्थविदा शक्यं द्विष्ठमेकत्वकल्पनम् ॥ १५ ॥

---

१ प्रत्यक्षस्य ।

नापोहमात्रं तद्धेतुस्तद्विशेषः स नेह चेत् ।
किमवस्तुन्यपोहे स्याद्विशेषो वस्तुसम्भवः ॥ २८ ॥

तत्तयोरपि सादृश्यं भवत्येवं ततो भवेत् ।
तत्रैकमिति धीर्यद्वत्पूर्वापरवटक्षणे ॥ २९ ॥

एकार्थक··· ··· ···रयम् ।
नास्त्येकत्वसमारोप इत्युक्तिः प्राङ्निरूपिता ॥ ३० ॥

किञ्च कर्काद्यपोहश्चेदसमः खण्ड-मुण्डयोः ।
समानप्रत्ययो नास्मात्समश्चेत्स्वमतच्युति. ॥३१॥

ततोऽसङ्करभावेन वस्तुन·-प्रतिपत्तये ।
तिर्यगूर्ध्वगसामान्यात् [समानप्रत्ययो भवेत्] ॥ ३२ ॥

व्यावृत्त्यैकस्वभावत्वे सा स्वतोऽपीति शून्यता ।
स्वस्वरूपादि यन्नो चेन्न भवेत्तत्स्वभावता ॥३३॥

व्यावृत्ति(त्ती)नां स्वतो भेदे भवेत्तासां च वस्तुना ।
न ह्यवस्तुनि नीरूपे स्वस्वरूपेण भिन्नता ॥३४॥

ततो नानात्मकं वस्तु व्यावर्त्या त(त्त ?)दभिदेति चेत् ।
··· ··· 'नित्यादे' स्यात्ततोऽभिदा ॥ ३५ ॥

नित्यादेः कल्पितत्वं चेत्स्यादन्योन्यसमाश्रयः ।
नित्यादौ सत्यनित्यादि·-तस्मिन्नित्यादिरित्ययम् ॥३६॥

बुद्धौ भेदावभासेन नित्यादेश्चेद्भिदा तथा ।
अन्यत्राऽपीति तद्भेदो न स्याद्व्यावर्त(र्त्य)भेदतः ॥ ३७ ॥

व्यावर्ता(र्त्या)त्तद्भिदा [भेदश्चिदचि]द्वस्तुव्यवस्थिति· ।
अचिदेव हि चिच्च स्याद्व्यावृत्तेश्चेतनान्तरात् ॥ ३८ ॥

अचिदन्या चिदित्येवमादौ मच्चेतितं तत. ।
चिदन्तरं च चिच्चेत्स्यादत्राऽप्यन्योन्यसंश्रयः ॥ ३९ ॥

दानादिसहकृद्युक्ता चेत्ता चाय न नस्य तैः ।
नो चेदतिशयो धा(याधा)[नं कथ स्याद्दा]निता च तत् ॥५२॥

विनाऽप्यतिशयाधानं चित्तात्तत्सहितादयम् ।
नियमश्चेत्तथा किं न नित्यादर्थक्रिया भवेत् ॥ ५३ ॥

प्रकृत्या नियमोऽयं चेच्चिच्चैवं भूत-संहृतेः ।
प्रकृत्यैव विजातीयकार्यस्यापि हि सम्भवः ॥ ५४ ॥

स्वालक्षण्यातिरिक्तं चेच्चिदचित्वं स्वलक्षणे ।
[भूतिसंहृतिर]त्र स्यादन्यथा सा हि शब्दतः ॥ ५५ ॥

व्यावृत्त्या चिदचित्वं च वास्तवं किमवास्तवम् ।
पूर्वं चेत्स्यादनेकान्तः परं चेदुभयं समम् ॥ ५६ ॥

तथा स्याच्चेदुपादानमचिच्चे त मतान्तरम् ।
ततश्चिच्चित एव स्यादित्ययं नियमोऽपि न ॥ ५७ ॥

दातुरेव ततः स्वर्गो [नास्याप्यस्ति नि]यामकम् ।
न व्यावृत्त्यादिनाऽप्येष नियमो मानगोचरः ॥ ५८ ॥

न हि संसारिणां मानान्नियमे(मो) दृश्यतेऽधुना ।
बौद्धागमस्तु मानं न मान-द्वैविध्य-हानितः ॥ ५९ ॥

अनुमानात्मकः सोऽपि मानं चेल्लिङ्गमात्रकम् ।
न हि तन्नियमे किंचिदविनाभावि [साधनम्] ॥ ६० ॥

अनुमान तु लिङ्गार्थं तल्लिङ्गं च त्रिधा मतम् ।
कार्यलिङ्गं तु नाऽत्रास्ति कार्यस्यैवाविनिश्चयात् ॥ ६१ ॥

कार्यकारणयोर्यस्मान्नैरंश्ये नियतिक्षयः ।
भावस्यैवाऽत्र साध्यत्वात्तन्न चानुपलम्भनम् ॥ ६२ ॥

स्वभावाख्यं च वस्तुत्वे साध्यसाधन[धर्मयोः] ।
व्यावृत्त्या तदयुक्तत्वात्तथा चैकमनेकधा ॥ ६३ ॥

[४. क्रमानेकान्त-सिद्धिः]

पूर्वापरेषु चित्तेषु नैकत्वं चेत्तदा कथम् ।
सन्ता[नो हि भवेत्तत्र ततः] कर्तुः फलात्ययः ॥ १ ॥

कारणान्यत्वतोऽस्य चेज्जनकात्मजयोर्भवेत् ।
उपादानान्यभावाच्चेत्स च किं न तयोरपि ॥ २ ॥

सर्वथाऽन्योन्यभिन्नानां चित्तानामेव सम्भवत् ।
तद्भावः स तयोश्च स्यात्स्यादभेदे हि जैनता ॥ ३ ॥

सादृश्यभावतस्तत्र तद्भावो यदि ने[ष्यते] ।
[तद्भावो न तदा तत्र सा]दृश्ये हि विनश्यति ॥ ४ ॥

देश-कालकृतं तत्र नैरन्तर्यं न चेदसत् ।
न हि स्वलक्षणाद्भिन्नो देशादिः सौगते मते ॥ ५ ॥

तस्मादेकान्त-भेदेऽपि कार्य-कारणरूपतः ।
तयोस्तद्भावसिद्धयै स्यादेकसन्तानताऽपि च ॥ ६ ॥

यत्र सत्त्वोपलम्भः स्यात्सन्तानस्तत्र चेद[मत्] ।
.... नैरन्तर्यादिना परः ॥ ७ ॥

किं चाभिमत-सन्ताने सादृश्यादेश्च सम्भवः ।
कार्य-कारणभावाभ्यामेव स्यात्स तयोर्न किम् ॥ ८ ॥

सोऽहमित्येकविज्ञानादेकसन्तानतेष्यते ।
तज्ज्ञानं तु तयोर्नास्ति पृथगेव तदीक्षणात् ॥ ९ ॥

इति चेत्सर्वथा भेदे कार्यान्यत्वे [तयोरपि] ।
[तज्ज्ञान न भवे]त्कस्माद्यतो नियतसन्ततिः ॥ १० ॥

एकत्व वासना-दार्ढ्यान्न(न्न) तज्ज्ञान क्वचिद्भवेत् ।
क्वाचित्के सति तज्ज्ञाने सा स्यात्तस्यां हि तत्क्वचित् ॥ ११ ॥

प्रागसत्सत्पुनश्चेत्स्यात्क्षणिकत्वं विनश्यति ।
पौर्वापर्ये हि सत्येव वस्तुनस्तद्द्वयं भवेत् ॥ २४ ॥

नैवं स्याद्वादिनां दोषः [सदसद्द्रव्यभा]वतः ।
व्यक्त्यात्मना ह्यसत्पूर्वं सद्विपक्षात्तदात्मना ॥ २५ ॥

चैत्रैकज्ञानवच्चित्रे क्रमेणाऽपि च वस्तुना(नः) ।
कार्यकारणतेष्टा तैस्तथा निर्बाधबोधतः ॥ २६ ॥

व्यक्तिरूपं न चेत्पूर्वं तच्छक्तेरेव भावतः ।
तथाऽप्यनित्यतैव स्यादभेदे शक्ति-तद्वतोः ॥ २७ ॥

भेदाभेदेऽप्यभेदस्य स[त्व हि स्यादनित्य]ता ।
पर्यायस्यैव युक्ता स्याद्भेदैकान्ते हि युक्तता ॥ २८ ॥

इति चेन्न तथाऽनिष्टेर्नष्टानष्टत्वदर्शनात् ।
द्रव्य-पर्यायतैकस्य वस्तुनो ह्यत्र सम्मता ॥ २९ ॥

नष्टमेव ह्यनष्टं च तथा निर्बाधबोधतः ।
तत्तत्स्थैर्येतरात्मत्वाद्द्रव्य-पर्यायतेष्यते ॥ ३० ॥

[द्रव्यपर्यायतै]कस्मिन्न स्यात्तद्धि द्वयोर्यदि ।
द्वित्वं च स्यान्नयोद्धाराद् द्रव्यं पर्याय इत्यतः ॥ ३१ ॥

द्रव्याविनाशे पर्याया नाशिनः किं तदात्मकाः ।
नष्टाः पर्यायरूपेण नो चेद्द्रव्य-स्वभावतः ॥ ३२ ॥

किमन्यरूपता तेषां न चेन्नाशस्तदा कथम् ।
इत्यादिबौद्धवाङ्मौढ्यादज्ञाते [न विकल्पनम्] ॥ ३३ ॥

ततः स्यात्कार्यकारित्वं स्याद्वादे युक्ति-भूषितम् ।
क्षणिकैकान्ते तु नैव स्यादुक्त-दूषण-सम्भवात् ॥ ३४ ॥

किञ्च क्षणिकतः कार्ये नानाशक्त्यात्मकं च तत् ।
उपादानं स्वकार्ये हि परत्र सहकार्यपि ॥ ३५ ॥

इत्यसारं, तथात्वेऽपि कां(का) [लं] चापेक्ष्य कार्यकृत् ।
प्रतिपक्षाव्युदासेन न च पक्षव्यवस्थिति. ॥ ४६ ॥

तद्द्वयोरप्य [भेदः स्यादप्राक्तनो] त्तरभावतः ।
किञ्चात्रैकमुपादानं सहकार्येव वा भवेत् ॥ ४७ ॥

रूपाद्यन्यतमं च स्यात्तस्मादेवं च सांशता ।
पूर्वापरत्वमात्रेण नियतेनात्र कल्प्यते ॥ ४८ ॥

कार्यकारणरूपत्वं बीजाङ्कुरवदित्यसत् ।
निरंशे नियमाभावः प्रागेव [प्रतिषेधितः] ॥ ४९ ॥

बीजाङ्कुराद्यसाङ्कर्यं सांशेऽर्थे शक्यशक्तित. ।
हेतोः सकृदनेकान्ते सांशत्वं च समर्थितम् ॥ ५० ॥

न च पूर्वापरीभावनियमे मानमित्यपि ।
एकान्तक्षणिकं वस्तु तन्नास्त्यर्थक्रियाऽत्ययात् ॥ ५१ ॥
क(ख)रशृङ्गवदित्येवं तदेकान्तो निरा[कृतः] ।
.... हानौ व्याप्यक्षणिक-हानितः॥ ५२ ॥

नित्यवत्तदभावाद्धि नित्याभावोऽपि सम्मतः ।
ततः सन्तान-सादृश्य-साध्य-साधन-तत्क्रियाः ॥ ५३ ॥

तासां च कल्पका बोधा न स्युः क्षणिकवादिनाम् ।
अन्यथानुपपत्त्या च स्मृत्यादेः स्यादभिन्नता ॥ ५४ ॥

न हि [स्यादेकताऽभावे बौद्धानां] स्मरणादिकम् ।
एकसन्तानचित्तेषु पूवपूर्वप्रवर्तिते ॥ ५५ ॥

उत्तरस्यैव तद्द्रष्टेः स्याद्भेदोऽस्तु [हि] सन्ततौ ।
न स्यात्सन्तत्यभेदेऽपि विस्मृतिश्चेत्स्मृतिः कथम् ॥ ५६ ॥

भेदैकान्ते, ततो युक्तं तद्द्वयं स्यादभेदतः ।
वासनातः स्मृतिश्चेत्साऽनित्ये(त्यै)व स्यान्न चापरा ॥ ५७ ॥

न वहिर्गमकत्वं हि वहिस्सत्त्व इवासतः ।
वहिरन्वयिनो व्याप्तिः साध्येन सुखनिश्चया ॥ ७० ॥
नान्यस्य तत्तयोर्नैव तुल्या गमकतेत्यसत् ।
सा न यस्य च दृष्टान्त एव चेद्व्याप्तिनिश्चयः ॥ ७१ ॥
व्यर्थेयं साध्यनिर्णीतिर्दृष्टान्ते [हि दृष्टान्त]रात् ।
तद्विनिश्चयतस्तत्र साध्यनिर्णीतिकल्पने ॥ ७२ ॥
तद्विनिश्चयतः सा स्यात्तस्याः स इति दूरणात् ।
दृष्टान्तेऽप्यन्यदृष्टान्ते यदि व(त)न्निर्णयस्तदा ॥ ७३ ॥
तत्रापि चान्यतस्तत्राऽप्यन्यतश्चेति न स्थितिः ।
साकल्ये वै(नैव) दृष्टान्ते यदि तन्निर्णयः स वै ॥ ७४ ॥
पक्षेऽप्यवश्यं [खलु स्यात् दृष्टान्ते] न हि सोऽन्यथा ।
तस्मादवश्यंभावित्वादन्तर्व्याप्तिस्तथैव च ॥ ७५ ॥
सान्वये गमकत्वाच्च परत्राऽपि तथैव तत् ।
अन्तरप्यवसायश्चेद्व्याप्तेः स्यादनुमा वृथा ॥ ७६ ॥
तस्मादेव प्रसिद्धत्वात्साध्यस्यापीति चेदसत् ।
द्वय-स्वरूप-ग्रहणे सति सम्बन्ध-वेदनम् ॥ ७७ ॥
इति ब्रुवा[णस्य सोऽय]दोषः स्याद्वादिनां तु नः (न) ।
तथोपपत्तिरेवेयमन्यथानुपपन्नता ॥ ७८ ॥
सा च हेतोः स्वरूपं तत् ह्यन्तर्व्याप्तिश्च विद्धि नः ।
सामग्री-विकलत्वेन सङ्केतरहितो न ताम् ॥ ७९ ॥
वेत्तैव हेतुदृष्टा च क्षणिकत्वादिकं यथा ? ।
किञ्चोहात् साध्यमात्रस्य वित्तिः स्यादनुमानतः ॥ ८० ॥
[व्याप्ति ?]काल-विशिष्टस्य तस्येति सफलाऽनुमा ।
अपि च व्याप्ति-काले हि साध्यधर्मस्य निर्णयः ॥ ८१ ॥

[५. भोक्तृत्वाभाव-सिद्धिः]

[नित्यैकान्तो न योग]योऽयं कर्तुर्भोक्तृत्वहानितः।
कर्तृत्वे सत्यभोक्तृत्वादस्मिन् कर्तृत्व-हानितः॥ १॥
कर्तृत्वमपहायैव भोक्तृत्वं स्यादनित्यता।
कर्तृत्वादेरभिन्नत्वाद्भिन्नत्वे नात्मनो हि तत्॥ २॥
कर्तृत्वादेश्च बुद्ध्यादेरिव सम्बन्ध आत्मना।
समवायस्ततस्तस्य स्यादात्मी[यत्व चेत्य]मत्॥ ३॥
असिद्धेः समवायस्य प्रत्यक्षादिप्रमाणतः।
न ह्यस्याध्यक्षवेद्यत्वं विवादस्यैव दर्शनात्॥ ४॥
निर्णयैकत्वरूपं हि प्रत्यक्षं न्यायवेदिनाम्।
निर्णीतेऽपि विवादश्चेत् गुण्यादावपि किं न सः॥ ५॥
विवादो यदि तत्राऽपि विभ्रमैकान्तस[भवात्]।
[चेत्तस्या]निर्णयात्मत्व न च ज्ञानस्य सम्मतम्॥ ६॥
न चानिर्णीतसिद्धत्वं[1] ज्ञानाद्वैतादिवद्भवेत्।
नागमाच्चास्य[2] सिद्धत्वं तत्प्रामाण्ये विवादतः॥ ७॥
इह शाखासु वृक्षोऽयमिति सम्बन्धपूर्विका।
बुद्धिरिहेदंबुद्धित्वात्कुण्डे दधीति बुद्धिवत्॥ ८॥
इत्य[सद्वन-चूतादि-बुद्धि]तो व्यभिचारतः।
वने चूत इहेत्यादौ सम्बन्धोऽन्यो हि नेष्यते॥ ९॥
समवायाख्यसम्बन्धो न ह्यस्ति वन-चूतयोः।
गुणः(ण)गुण्यादिवत्तत्र न ह्यस्त्ययुतसिद्धिता॥ १०॥

१ समवायस्य। २ समवायस्य।

बुद्ध्याद्याधारता मुक्तेऽप्यात्मव्यापित्वतः समा ।
ततो बुद्ध्यादिसम्बन्धः स्यात्तस्याऽप्यविशेषतः ॥ २३ ॥

अमुक्तप्रभवत्वं स्याद्विशेषोऽत्रेति चेदसत् ।
मुक्त-प्रभवता किं न बु[द्ध्यादेरविशेष]तः ॥ २४ ॥

बुद्ध्याद्या(देः) कारकत्वं हि मुक्ताऽमुक्तात्मनोः समम् ।
अन्यथा प्रागकुर्वत्वकुर्वत्वां (तां) नित्यता-क्षयात् ॥ २५ ॥

अमुक्त-समवेतत्वात्स्यात्तत्प्रभवेत्यसत् ।
तस्य सत्समवेतत्वे सा स्यात्तस्या हि तद्भवेत् ॥ २६ ॥

अमुक्तात्मन्यदृष्टादेः सत्वाद्बुद्ध्यादिरत्र चेत् ।
मुक्तेऽपि [स्याददृष्टादि]सम्बन्धस्याविशेषतः ॥ २७ ॥

संयोगोऽन्योपि सम्बन्धो ह्यदृष्टाद्यैस्तयोः समः ।
समः स्वस्वामिसम्बन्धमात्र चानुपकारतः ॥ २८ ॥

उपकारोऽपि भिन्नश्चेत्सम्बन्धोऽन्येन न स्थितिः ।
उपकारान्तराक्षेपादभेदे नाऽऽत्म-नित्यता ॥ २९ ॥

मुक्तस्य तु न योग्य[त्वमभिन्ने] करणे यदि ।
तन्नाशात्तदनित्यत्वमभेदाद्धे ददूषणात् ॥ ३० ॥

तस्मादतिप्रसङ्गस्य(स्या)परिहारः प्रागुदीरितः ।
आत्म-बुद्ध्योरभेदादिविधिः स्यात्समवायतः ॥ ३१ ॥

तदभ्युपगमे तु स्यात्प्रागुक्तं दूषणं ततः ।
धर्मकर्तुः फलाभावो नित्या(त्यैकान्त)वा''क्तितः(प्रवादिनः)।३२।

इति नित्यवादिनं प्रति धर्मकर्तु-
र्भोक्तृत्वाभाव-सिद्धिः ॥५॥

देहस्यानादिता न स्यादेतस्यां च प्रमाऽन्ययात् ।
सोपायो यदि वक्ता स्यादयमेवाऽस्तु सर्ववित् ॥ १२ ॥

निरुपायोऽस्ति सोपायाद् द्वेधाद्वा तस्य सिद्धितः ।
इत्यस[त्तस्य दुष्टात्वान्] नित्यैकान्तवदप्रमा ॥ १३ ॥

नित्यैकान्तस्य दुष्टत्व प्रागेव च निरूपितम् ।
एकं शास्त्र क्वचिन्मानं क्वचिन्नेत्यनिबन्धनम् ॥ १४ ॥

निरुपायो न वक्ता चेत्सोपायो नानुपायतः ।
आगमोक्त उपायस्य(श्चेत्)नाऽऽगमो वक्तृ-हानि च (नितः)॥१५॥

सोपायानां[तदीशो हि ना]गमस्योपदेशकः ।
निरुपायो न वैयर्थ्यात्प्रमा-हानेश्च साधनात् ॥ १६ ॥

किञ्च वेद-प्रमाणं न विरुद्धार्थावबोधनात् ।
एकान्ताभेद-भेदौ हि तत्रोक्तौ सर्व-वस्तुन ॥ १७ ॥

तथा सर्वविदस्तीति स नास्तीति च चर्चितम् ।
हिरण्यगर्भ सर्वज्ञ इत्यादेर्वे[दवाक्यतः] ॥ १८ ॥

नियोग-भावनारूपं भिन्नमर्थद्वयं तथा ।
भट्टप्रभाकराभ्यां हि वेदार्थत्वेन निश्चितम् ॥ १९ ॥

अर्थवादत्वमेकस्य तद्वाक्यस्येति चेदिदम् ।
कुतो ज्ञातं न वेदात्स्यात्सर्वार्थ-प्रतिपादनात् ॥ २० ॥

सव्याख्यानां न(तान्न) वेदाच्च नियतार्थ-विनिश्चयः ।
[तद्व्याख्यानस्य] बाहुल्याद्भिन्नार्थ-प्रतिवा(पा)दिनः ॥ २१ ॥

ततः प्रमाण-वैकल्याददेहो देहवानपि ।
निरुपायो न सर्वज्ञः सोपायोऽप्युक्तदूषणः ॥ २२ ॥

इति नित्यैकान्तप्रमाणे सर्वज्ञाभाव सिद्धि. ॥६॥

आत्मदृष्टानुकूल्ये ....चेत्परवानयम् ।
स्यादज्ञो वाऽन्यथा ज्ञात्वा स्व-बाधान्को विधित्सति ॥ ९ ॥
ततः सर्वज्ञ एव स्याज्जगत्कर्तेति बुद्धितः ।
तत्कर्तृसाधनायोक्तं मान(न)किञ्चिज्ञसाधनम् ॥ १० ॥
तच्चेदं स्यान्महीध्रादि बुद्धिमद्धेतुक, यथा ।
कुम्भाद्यचिदुपादानात्कार्यत्वाद्वा भ[वे]रि(दि)ति ॥ ११ ॥
किञ्चिज्ञश्च भवेन्नैव जगत्कर्ताऽस्मदादिवत् ।
ततोऽयं कर्तृवादी स्यात्स्ववधाय कृतोद्यमः ॥ १२ ॥
स्व-परद्रोहिदैत्यानां सृष्ट्यभ्युपगमान्नतु ।
कर्तुः किञ्चिज्ञता सिद्धा तत्किं नाऽयं सुबो(बा)धकः ॥ १३ ॥
दैत्यस्यादृष्टतः सृष्टौ परवानज्ञ एव वा ।
दैत्याऽदृष्ट-द्वयोः सृष्टौ मिथो स्याद्व्यभिचारिता ॥ १४ ॥
अतत्कार्यसुरादौ च कार्यत्वादेर्विलोकनात् ।
अदृष्टं स्यादपूर्वादि चिदुपादानमित्यसत् ॥ १५ ॥
अदृष्टं चाचिदुत्पन्नं मोहकृत्वात्पु(त्सु)रादिवत् ।
मोहः सुरादितो दृष्टो ह्यदृष्टश्च तदत्यये ॥ १६ ॥
ततोऽचिदाऽत्र दृष्टेयमन्वय-व्यतिरेकता ।
मोहस्येत्यचिदेवेदं दृष्टं मोहकृतेरिति ॥ १७ ॥
तया[1] कारण-कार्यत्वं धूम-वह्न्यादिपूच्यते ।
अनित्यत्वाददृष्टस्य कार्यत्वमविवादतः ॥ १८ ॥
हेतु-द्वयं च दैत्याङ्गे ततः स्याद्व्यभिचारिता ।
आत्मस्वाकाश-कालादेरेव यस्मादकार्यता ॥ १९ ॥

---

१ अन्वयव्यतिरेकतया, 'अन्वय-व्यतिरेकसमधिगम्यो हि कार्य-कारणभावः' इत्यर्थः ।

वीतरागस्य नेच्छाऽस्ति कथं स्याद्वक्तृतेत्यसत् ।
न हि स्या[1]त्तया[2],स्याच्चेत्, तयाऽ[3]ज्ञस्याऽस्तु शास्त्रवाक् ।।८।।
[4]तदिच्छायामवक्तृत्वाद्, गोत्र [प्र]स्खलनादिषु ।
तदभावेऽपि वाग्दृष्टे[5](ष्टा), सा पुंज्ञानात्, न चेच्छया ।।९।।
सार्वज्ञ-सहजेच्छा तु विरागेऽप्यस्ति, सा हि न ।
रागाद्युपहता, तस्माद्भवेद्वक्तैव सर्ववित् ।। १० ।।
पुरुष[त्वादि]हेतुश्च नैव सर्वज्ञ-बाधकः ।
जैमिन्यादौ च तद्दृष्टेर्विरोधाभाव-निश्चयात् ।। ११ ।।
किञ्चिज्ज्ञे तद्दृशिश्चेत्स्यात्सर्वज्ञेऽप्यविरोधत ।
विरोधो ह्यल्पयोश्च स्यादल्पो दीपान्धकारवत् ।। १२ ।।
वेद-वाक्यं प्रमाणं न विरुद्धार्थावबोधनात् ।
उन्मत्त-वाक्यवत्तन्न भेदाभेदौ विरोधिनौ ।। १३ ।।
अर्थवादत्वमेकस्येत्येतत्प्रागेव दूषितम् ।
तन्न वेदान्न[1] तद्बाधस्तत्सर्वज्ञोऽस्त्यबाधतः ।। १४ ।।
एवं सार्वज्ञ्य-सद्भावाद्भगवत्यर्हति स्फुटम् ।
अन्येष्वसम्भवाच्च स्यात्स चोपास्य इति स्थितम् ।। १५ ।।
अपि चातीन्द्रियार्थत्वे पुंवाक्यत्वान्न हि प्रमा ।
अर्हद्वाक्यं यथा बुद्धवाक्यमित्यपि दुर्मतम् ।। १६ ।।
ऐन्द्रियार्थे हि वाग्दृष्टा दोषैर्णैवाप्रमाऽन्यथा[6] ।
आप्तवाक् चाप्रमा स्यात्तत्सा [7]परोक्षेऽपि तेन सा ।। १७ ।।

---

१ वक्तृता इति शेषः । २ इच्छया । ३ इच्छया । ४ अज्ञस्य । ५ सर्वज्ञे
६ प्रमा च गुणैनैव । ७ अतीन्द्रियेऽर्थे ।

कुञ्चिकाविव चोत्पन्न-मिथ्या-मणि-धिया कथम् ।
मणिर्लभ्यते चेन्नैवं तल्लाभो न हि तद्धिया ॥ ५ ॥

गृहान्तर्मणिमध्यक्षात्पश्यतो मणि-लाभतः ।
तन्निमित्तं तु मिथ्यादिस्तन्नेष्टाप्तिरमानतः ॥ ६ ॥

साध्यते विभ्रमैकान्तस्तदन्योपाय-हानितः ।
पा[रि]शेष्याच्च न [मानं स्याद्वि]भ्रमनिषेधने ॥ ७ ॥

इति चेत्तद्द्वय च स्यान्ना(न्मा)नमिष्ट प्रसाधने ।
अमानादनुपायादेरसाध्य. किमविभ्रम. ॥ ८ ॥

ततो यथाऽविनाभावः प्रमाणास्तित्व-साधने ।
अदृष्टान्तेऽपि निर्णीतस्तथा स्यादन्य-हेतुषु ॥ ९ ॥

दृष्टान्त-रहिते कस्मादविनाभावनि[र्णय] ।
[अ]न्यत्र ज्ञात सम्बन्ध-साध्य-साधनयोर्भवेत् ॥ १० ॥

इति चेत्पक्ष एव स्यादविनाभाव-निर्णयः ।
विपक्षो(क्षे) बाध-सामर्थ्यात्तर्काच्चास्य विनिश्चयः ॥ ११ ॥

पक्षे तन्निर्णयो न स्यात्साध्यस्याप्रतिपत्तितः ।
साध्य-साधनवित्तौ हि पक्षे तन्निर्णयो भवेत् ॥ १२ ॥

अथ साध्यपरि[च्छेदस्तर्का]दन्यत एव वा ।
सिद्धमेव भवेत्साध्यं तत्सिद्धयर्थानुमा वृथा ॥ १३ ॥

इति चेदविनाभावः साध्य(ध्या)ज्ञानेऽपि गम्यते ।
तस्य हेतोः स्वरूपत्वात्सामग्रीतोऽस्य निर्णयः ॥ १४ ॥

तदभावे त्वनिर्णीतिः क्षणिकत्वादिवद्भवेत् ।
ततोऽनुमापि ना सा)र्था स्यात्तया साध्यस्य [बोध]तः ॥१५॥

अथवा, साध्य-सामान्य-वित्तर्कस्तद्विशेषव(वि)त् ।
अनुमाहेतुना व्याप्तिस्तत्सामान्यस्य हीष्यते ॥ १६ ॥

पौरुषेयो भवेद्वेदो वर्ण-वाक्यात्मकत्वतः ।
भारतादिवदित्येवमनुमानस्य दर्शनात् ॥ ३ ॥

वेदे वर्णस्य वर्णानामभिव्यक्तिक्रमस्य च ।
नित्यताऽन्यत्र वर्णानामेक-वक्तृ-स्मृतेर्यदि ॥ ४ ॥

न च वर्णस्य नित्यत्वं देश-कालादिभेदिनः ।
तस्यैव प्रतिपन्नत्वात्घटादेरिव सर्वथा ॥ ५ ॥

स एवायमकारादिरित्यादिप्रत्ययोऽपि वै ।
सादृश्यात्स्यादभेदाच्चेदात्माद्वैतश्च सम्भवेत् ॥ ६ ॥

सैवेयं स्यादहंबुद्धिरिति प्रत्ययभावतः ।
साध्यते तच्च नाभेदप्रत्ययाद्भेदविभ्रमात् ॥ ७ ॥

भ्रान्तेयं प्रत्यभिज्ञा स्यादात्म-भेदस्य दर्शनात् ।
अभेदे सुख-दुःखादेः प्रत्यात्मो(त्म ?)नियतिः कथम् ॥ ८ ॥

इति चेत्किं न वर्णेषु भ्रान्तौ सा तुल्यदोषतः ।
उदात्तान्यादिभेदो हि सर्वस्तत्र च वीक्ष्यते ॥ ९ ॥

अभिव्यञ्जक-वाय्वादेर्भेदाद्भेदोऽत्र चेदयम् ।
उपाधिभेदतोऽभीष्टा सुखादेर्नियतिः परैः ॥ १० ॥

प्रदेशाद्यै रखण्डस्य नित्यशुद्धस्य चात्मनः ।
व्यापिनोऽन्यैर्न भेदश्चेत्तादृग्वर्णेष्वयं कथम् ॥ ११ ॥

ततः स्यात्प्रत्यभिज्ञानाद्दोष-साम्याच्च सर्वथा ।
वर्ण-नित्यत्वसिद्धिश्चेदात्माद्वैतस्य च स्थितिः ॥ १२ ॥

वाच्य-वाचकसम्बन्ध-परिज्ञानं न सम्भवेत् ।
वर्णादेश्चेदनित्यत्वं सङ्केतित-वचः-क्षयात् ॥ १३ ॥

स्यादयं गौः पटोऽयं स्यादिति सङ्केतितं वचः ।
स्थायि चेत्तदनुस्मृत्या वाच्ये(च्यो)ऽर्थो हि न चान्यथा ॥१४॥

यद्वेदाध्ययनं सर्वं तदध्ययन-पूर्वकम् ।
तदध्ययन वाच्यत्वादधुनेव भवेदिति ॥ २७ ॥

इत्यस्मादनुमानात्स्याद्वेदस्यापौरुषेयता ।
ततः स्यात्पौरुषेयत्व-प्रतिज्ञाऽनेन बाधिता ॥ २८ ॥

इति चेत्स्यादयं हेतुरप्रयोजक एव वै ।
अविनाभाव-वैकल्यात्तद्भावेऽस्याप्ययं भवेत् ॥ २९ ॥

पिटकाध्ययनं सर्वं तदध्ययन-पूर्वकम् ।
तदध्ययन-वाच्यत्वादधुनेव भवेदिति ॥ ३० ॥

अपौरुषेयता वेदे कर्तुरस्मरणाद्भवेत् ।
इति चेत्साऽनुमा व्यर्था न हि सिद्धस्य साध्यता ॥ ३१ ॥

कर्तुरस्मरणादेव सा साध्या चेत्तथा न किम् ।
बौद्धैरपि तदस्मृत्या पिटके साऽपि साध्यते ॥ ३२ ॥

बौद्धैः स्मृतोऽत्र कर्ता चेद्वेदेऽपि स्मृत एव सः ।
तैरप्यत्रास्मृतोऽयं चेदसाध्याऽपौरुषेयता ॥ ३३ ॥

श्रुतौ तत्स्मृतिरन्येषां प्रमा मा चेन्न तु प्रमा ।
तत्स्मृतिः पिटकेऽपि स्याद्बौद्धीयत्वाच्छ्रुताविव ॥ ३४ ॥

पिटके तत्स्मृतिश्चेत्स्यात्प्रमा प्रामाण्यमप्यलम् ।
पिटके स्याद्धि बौद्धाना तत्स्मृतेरपि भावत ॥ ३५ ॥

प्रामाण्यं पिटके न स्याद् बौद्धस्यैवात्र तत्स्मृतेः ।
कर्तृमत्वं तु सिद्धं स्यात्परैरप्यत्र तत्स्मृते. ॥ ३६ ॥

इति चेत्कर्तृभावोऽपि तद्रस्मृत्या श्रुतौ कथम् ।
बौद्धस्य तत्स्मृतेरेव भावात्तत्कर्तृसिद्धितः ॥ ३७ ॥

ततो यथैव बौद्धानां प्रामाण्यस्मृतिरप्रमा ।
पिटके स्यात्तथा वेदेऽप्यप्रमैव तदस्मृतिः ॥ ३८ ॥

परतोऽस्य [हि] चोत्पत्तिरिन्द्रियाणामदोषतः ।
हेतोस्त्रैरूप्य-साकल्याच्छब्दस्याप्ताच्च सम्भवात् ॥ १० ॥

दोषाभावो गुणः कस्मान्नीरूपत्वतयेत्यसत् ।
त्रैरूप्याभाव एवं हि हेतुदोषो न सम्भवेत् ॥ ११ ॥

पक्षधर्मत्वमुख्यैतत्त्रैरूप्याभावतः परम् ।
दोषो नास्ति ह्यदृष्टोऽपि स्याच्चेत्स्यादिन्द्रिये गुणः ॥ १२ ॥

ततो दोषान्तरादृष्टे त्रैरूप्याभाव एव वै ।
हेतुदोषो गुणोऽप्येव स्याद्दोषाभाव इन्द्रिये ॥ १३ ॥

किञ्च स्याद्दोष एषोऽपि त्रिरूपाभाववादिनाम् ।
भिन्नो भावो ह्यभावोऽपि भेदाभेदप्रवादिनाम् ॥ १४ ॥

हेतोरपि गुणस्तस्य तत्साकल्यं न चेदिदम् ।
गुणो भवेत्स दोषोऽपि तद्वैकल्यं कथं भवेत् ॥ १५ ॥

हेतोः स्वरूपमेवेदं तत्साकल्यं यदीष्यते ।
तद्वैकल्यं न दोषः स्यात्स्वरूपाभाव एव वै ॥ १६ ॥

हेतौ तदन्यदोषोऽस्ति धीहेतुत्वात्तदक्षवत् ।
अक्षेष्वन्योऽपि दृष्टो हि काचादिरिति चेदसत् ॥ १७ ॥

अक्षेष्वन्यगुणोऽप्यस्ति धीहेतुत्वाद्यथा वचः ।
इत्यस्मादनुमानाद्धि गुणः स्यादिन्द्रियेष्वपि ॥ १८ ॥

दृष्टान्ते साध्यवैकल्यं शब्दस्यागुणवत्वतः ।
उभयवादिसिद्धो हि दृष्टान्त इति चेदसत् ॥ १९ ॥

शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितिः ।
तदभावः क्वचित्तावद्गुणवद्वक्तृकत्वतः ॥ २० ॥

इति वार्तिकतः शब्दगुणवत्त्वाविवादतः ।
गुणवद्वक्तृकत्वं हि शब्दस्यात्रैव सम्मतम् ॥ २१ ॥

न चान्यद्ग्राह्यमस्त्यत्र सा स्यात्किंविषया प्रमा ।
[1]मानसं नास्तिताज्ञानं नाद्याद्युद्भवमित्यसत् ॥ ४ ॥
स्वार्थानुमानसम्भूतिर्घटादिस्मरणे भवेत् ।
हेत्वादिवचने तत्स्यात्परार्थोऽपि च साऽनुमा ॥ ५ ॥
घटादिस्मरणाभावे ग्राह्या स्यात्केवलैव भूः ।
अध्यक्षान्न निषेधो वा विधिर्वाऽस्ति घटादिषु ॥ ६ ॥
विधिमात्रग्रहेऽध्यक्षादद्वैतस्थितिरित्यसत् ।
विधावन्यनिषेधोऽपि तयोस्तादात्म्यतो भवेत् ॥ ७ ॥
निषेध्याग्रहणेऽप्यन्यनिषेधः कथमित्यसत् ।
भावाभावात्मके भावे भाववित्स्यादभाववित् ॥ ८ ॥
तदभावो घटादेश्चेत्स्यादस्याभाव इत्यसत् ।
अन्याभावो हि जातोऽस्य स्वोपादानस्य शक्तितः ॥ ९ ॥
मरीचिकाद्यभावो हि जलादिग्रहणेन चेत् ।
ग्राह्यः कथं प्रवर्त्तेत निःशङ्कस्तदपेक्षकः ॥ १० ॥
ततोऽभावप्रमा नैव तद्ग्राह्यान्तर-हानितः ।
भावाद्भिन्नो न चाभावः कार्यद्रव्यं हि नान्यथा ॥ ११ ॥
प्रागभावे स्थिते तस्य घटादेर्नेह सम्भवः ।
तदुपमर्दनतश्चेत्किं स्यात्तदुपमर्दकम् ॥ १२ ॥
तत्कार्यस्य स्वरूपं चेत्स्यादन्योन्यसमाश्रयः ।
तदुपमर्दनकार्यात्कार्यं तन्मर्दनादिति ॥ १३ ॥

---

१ गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥
—मी० श्लो० अभाव० श्लो० ११ ।

तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।
इति तद्वान् विरोधश्च तन्न व्याप्तिविदक्षजम् ॥८॥

तद्विच्चेदनुमा तत्राप्यन्या तद्वित्पुनस्तथा ।
इत्येवमनवस्था वत्तद्वित्तर्क. प्रमा च सः ॥९॥

अगृहीतार्थताऽप्यस्य [नानास]कलनग्रहात् ।
नाध्यक्षादि हि नानोल्लेखात्म-सङ्कलने क्षमम् ॥१०॥

साध्य-साधनसम्बन्धस्तर्कस्य विषयः स च ।
तदुत्पत्त्यादिसम्बन्धाभावात्तद्विषयः कथम् ॥११॥

असम्बद्धार्थवोधानां घटोऽभूद्विषयः, पट. ।
नैवेति, नियमायोगाद्विषय[ज्ञानयोर्ननु] ॥१२॥

इति चेद्योग्यतैवास्तु सम्बन्धो विषयेऽस्य च ।
प्रत्यक्षस्येव तस्यापि योग्यता नन्वपेक्षते ॥१३॥

अन्यथा धीर्जडाकारा किं न वेद्ये घटादिके ।
साकारज्ञानवादे हि नैरंश्या धीर्न चांशवित् ॥१४॥

रूपेणै(णे)व रसाद्यैश्च सन्निकर्षेऽपि चक्षुषः ।
रसादि किं [न वेद्यं स्याच्चक्षुषा] योग्यता-द्विषाम् ॥१५॥

किञ्चासद्ग्रहणे बुद्धेर्योग्यतैव निवन्धनम् ।
तदुत्पत्त्यादिसम्बन्धो न नीरूपास(रूपाख्य)ता धियः ॥१६॥

तत्सत्यप्यन्यसम्बन्धे तदभावेऽपि योग्यता ।
अपेक्ष्येति, तया तर्के विषय-नियमो भवेत् ॥१७॥

ततस्तर्कप्रमा व्याप्तिज्ञाऽन्यथानुपपत्तितः ।
भवेत्तेनाविनाभाव-निर्णयश्चेति सुस्थितम् ॥१८॥

विपक्षे वाधनाज्ज्ञाताऽप्यन्यथानुपपन्नता ।
हेतोस्तथोपपत्तिस्तु कथं ज्ञेयेति दुर्मतम् ॥१९॥

आ····· ······· ·····नां तदात्मत्वे हि सत्ययम् ।
च्विप्रत्ययोऽन्यथा न स्यात्तथाभावोऽप्यभेदिनम् ॥८॥

पृथक्त्वाग्रहणादेव गुण-गुण्याद्यभेदधीः ।
वास्तवाभेदतो नात्र वन-सेनादिबुद्धिवत् ॥९॥

वनादेर्न ह्यभेदोऽस्ति विरलत्वस्य वीक्षणात् ।
तत्तत्राभेदधीर्न स्यात् ··· · ····· ···भेदधीः ॥१०॥

इति चेत्स्थूलधीश्चैवमणुष्वेवेति कथ्यताम् ।
बौद्धैर्वनादिदृष्टान्तादणुमात्र हि सम्मतम् ॥११॥

अतीन्द्रियत्वतोऽणूनामप्रतीतिस्ततः कथम् ।
स्थूलादिप्रतिभासोऽत्र प्रतीते(तौ) ह्यन्यथाग्रह. ॥१२॥

वनाद्यवयवा[श्चूत-शिंशपाद्यङ]घ्रिपादयः ।
दूरस्थानामिह भ्रान्तिर्युक्ता भेदाविनिश्चयात् ॥१३॥

तथा वनादिदृष्टान्तः सौगतानां न युज्यते ।
गुणाद्यभेद-विभ्रान्तौ युक्त एवेत्यसङ्गतम् ॥१४॥

न ह्येकान्तेन भिन्नत्वं गुणादीनां च तद्वतः ।
दृ[श्यते य]द्बलादत्राऽप्यभेद-भ्रान्ति-कल्पनम् ॥१५॥

ततोऽप्रतीतिरत्राऽपि समानैव तथा सति ।
अणुषु स्थूलबुद्धावप्यस्य दृष्टान्ततो भवेत् ॥१६॥

प्रधानस्थूलसापेक्षा स्थूलधीः परमाणुषु ।
स्थाणौ पुरुषधीर्यद्वदतस्मिस्तद्ग्रहत्वत. ॥१७॥

प्रधान' पुरुषो नो चेत्स्थाणौ च न हि तद्ग्रहः ।
इति गुण्यादिसिद्धेर्न स्थूलधीरणुसम्भवा ॥१८॥

इति चेद्गुण-गुण्यादावपि चैवमभेदधीः ।
न स्यादत्रापि न ह्यस्ति प्रधाना क्वाऽप्यभेदधी. ॥१९॥

एकबुद्धौ न युक्ता हि भ्रान्ताऽभ्रान्तस्वरूपता ।
विरोधादविरोधे स्यादेकस्यानेकरूपता ॥३२॥

तथा च गुण-गुण्यादेरभेदेऽप्यविरुद्धता ।
सिद्धेत्यभ्रान्तिरेवेय गुण-गुण्याद्यभेदधीः ॥३३॥

ततो हेतोश्च सिद्धत्वं, साध्ये सत्येव सम्भवात् ।
अविना[भाविनश्चे]ति नास्यासिद्ध्यादिदूषणम् ॥३४॥

दृष्टान्ते साध्य-वैकल्यमपि नैवात्र सम्भवेत् ।
संख्यावत्त्वे गुणादेश्च परेषां ह्यविवादतः ॥३५॥

द्वौ गन्धौ, षड् रसा, द्वे च सामान्ये, बह्वो मताः ।
विशेषा , समवायः स्यादेक इत्यादिदर्शनात् ॥३६॥

वास्तवी न[गुणादौ स्यात् संख्या,]सा ह्युपचारतः ।
तेषां तत्र गुणादीनां तादात्म्यं च तथेत्यसत् ॥३७॥

असतो हि समारोप उपचारस्तथा सति ।
अभाव एव संख्यायाः पृथिव्यादौ च सम्भवेत् ॥३८॥

एकत्रास्या हि भाक्तत्वे नैवान्यत्रापि सत्यता ।
निर्बाधत्वेन सत्यत्वं [सम्मतं सर्ववादिनाम्] ॥३९॥

वास्तवी चेद् गुणादौ स्यात्संख्या, स्युर्गुणिनो गुणाः ।
गुणसूत्रे[१] गुणत्वेन सख्याया पठितत्वतः ॥४०॥

गुणादेर्गुणवत्त्वं च नेष्यते न्यायवेदिभिः ।
गुणाः स्युर्निर्गुणा इ[ष्टाः शास्त्रे हि न्यायवेदिभिः] ॥४१॥

---

१ "रूपरसगन्धस्पर्शाः सख्याः परिमाणानि पृथक्त्वं सयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः ।"—(वैशेषिकदर्शन-सूत्र १–१–६) इत्यत्र गुणप्रतिपादके सूत्रे ।

न हि स्यात्समवायेन तत्सम्बन्धः, तथा परैः ।
अनुक्तत्वाद्, गुणादौ च द्रव्यत्वस्यानुषञ्जनात् ।।५४।।
समवायाच्च(यश्च)सम्बन्धः सम्बन्धादन्यतोऽथवा[1] ।
यत्र सम्बन्धनोऽयं स्यात् [सयोगोऽपि तथा भवेत] ।।५५।।
न सम्बध्नात्यसम्बद्धः परत्रैवमदर्शनात् ।
समवेतो हि संयोगो द्रव्यसम्बन्धकृन्मत. ।।५६।।
समवायान्तरेणास्य सम्बद्धेऽप्यनवस्थितिः ।
स्वतः सम्बन्ध एवास्य सम्बन्धत्वेन चेन्मतम् ।।५७।।
यथा नान्योऽत्र सम्ब''' ' ''''' ' '''''   द्रूपतः ।
स्वरूपमेव सम्बन्धः किं नैवं धर्मतद्वतोः ।।५८।।
किञ्चान्योन्याश्रयोऽपि स्यात्स्वतः सम्बन्धकल्पने ।
तद्धि सम्बन्धतासिद्धौ साऽपि तेनापि सिद्ध्यति ।।५९।।
सम्बन्धत्व प्रतीत्यैव समवायस्य कल्प्यते ।
स्वतः सम्बन्धतो नेति [नान्योन्याश्रय] इत्यसत् ।।६०।।
अप्रतीतेरतिव्याप्तेरभेदप्रत्ययादपि ।
समवायो न तत्रास्य सम्बन्धत्व प्रतीतित. ।।६१।।
समवाये प्रतीतिश्चेदध्यक्षमविवादता ।
निर्णयैकात्मना तेन ज्ञाते मशीत्ययोगतः ।।६२।।
सविकल्पकमध्यक्षं समवाये न चेद्यदि ।
[सविकल्प]कमस्तीति समवाये प्रतीतितः ।। ६३ ।।
इत्यसन्न हि तज्ज्ञानं दृश्यते क्वापि सौगतैः ।
उत्पमानमिवाध्यक्षं जडबुद्धिवदेव वा ।।६४।।

---

१ सम्बद्धो भवति तथाचानवस्थेति भाव. ।

तदवस्था गता न स्यात्सापि निर्णीतिरित्यसत् ।
तेऽप्यविद्या'' विहा स्यु' सा ह्यविद्याऽत्र चर्चिता ॥५४॥

अतस्मिंस्तद्ग्रहो भ्रान्तिरविद्या सापि कस्य वा ।
न ब्रह्मजीवयोर्युक्ता केन तद्धानिरित्यपि ॥५५॥

परतः प्रमितत्वं चेद् ब्रह्मण. स्यादनित्यता ।
पूर्वमप्रमितस्यैव पश्चात्प्रमितता यतः ॥५६॥

तस्य प्रमितता नो चेत्तदस्तीति वचः कथम् ।
स्फुरणाच्चेत्तदर्थोऽपि न ह्यन्यस्वपरग्रहात् ॥५७॥

स्फुरणमेव चेद् ब्रह्म तदस्तीति वचः कथम् ।
स्फुरणाच्चेत्तदर्थोऽपीत्यादिचोद्ये न चक्रकम् ॥५८॥

स्फुरणं नाम भानं स्यान्न'　　　'　　　'गमिति चेद'' 'म् ।
सर्वोद्भवमिदं ब्रह्म न विवादोऽत्र कस्यचित् ॥५९॥

इत्यसन्न हि तद्भानं सर्वभेद्ये व दृश्यते ।
प्रत्यात्ममानभिन्नं हि निर्विवादं विलोक्यते ॥६०॥

उपाधिभेदतो भेदः कल्पितो नैव वास्तवः ।
न ह्याकाशस्य भेदः स्याद् घटाकाशादिभेदतः ॥६१॥

इत्यसद्भेदसंवित्तिर्भ्रान्तित्वात् कल्पिता भवेत् ।
जीवब्रह्मान्ययोर्नेति प्रा[गेव प्रति]पादनात् ॥६२॥

किञ्च कल्पित एवायं भेदस्तस्येति निश्चयः ।
मानाच्चेद् द्वैतमन्यस्मात् किन्नायं स्यादकल्पितः ॥६३॥

न ह्यप्रमाणत. सिद्धं किञ्चिदेवेति युक्तिमत् ।
तस्माद्धानस्य भेदः स्यादबोधात्तेन''''''''''॥६४॥
निर्बाधे बाधशङ्कायां ब्रह्मण्यपि '''''''''''' ''।
''''''''''''''''''''स्वपराभ्यामिति स्थितम् ॥६५॥

द्विष्ठ[त्वाच्च] हि भेदोऽयं न ह्येकस्यैव यु[ज्यते] ।
पर्वते ग्रामतो दूरे किमदूर. स पर्वतात् ॥७६॥

स्वर्णस्य रुचकादेः स्यात् तद्विनाशेऽप्यनाशत ।
भेद एव न तस्यास्माद्विना स्वर्णमतद्दृशे. ॥७७॥

इति चेत्स्वर्णतो नित्यादभिन्ना रुचकादय' ।
किं नष्टास्तेपु चेन्न .... ''नाशवत् ॥७८॥

नापि स्वर्णादिरूपस्य नाशस्तद्रूपनाशतः ।
सर्वथा न हि नाशोऽस्ति दीपो हि तिमिरात्मना ॥७९॥

मिथस्तद्द्वयभेदेऽपि न ब्रह्मपरयोरयम् ।
यतो निर्वचनीयत्वं भेदान्याभ्यां तयोः स्थितम् ॥८०॥

अविद्यत्वात्परस्येति यद्'..... '.... सति ।
न ब्रह्मनित्यनिर्मुक्तं तथा तस्याविनिश्चयात् ॥८१॥

कुतो ब्रह्मणि मुक्तत्वमनिर्णीतं तदेति चेत् ।
अविद्याख्यपराद्भेदे तस्यावाच्येऽत्र संशयात् ॥८२॥

तस्मान्निरर्थिका, ब्रह्म सच्चिदानन्दरूपकम् ।
इत्यादिश्रुतिराविद्यारूपस्याप्यत्र सम्भवात् ॥८३॥

आविद्यतो हि निव' . .. ... ते ।
तद्भेदे कथं तस्य सर्वथा मुक्तिसम्भव. ॥८४॥

तन्मुक्तमेव चेद् ब्रह्म भिन्नं चाविद्यतस्तत. ।
तस्याभावो विरूपं स्यादितरेतरसंज्ञि(ज्ञ)क' ॥८५॥

तस्मिन् सति सदेकान्तरूपं ब्रह्म न सिद्ध्यति ।
तस्याभावेऽपि रूपे किं सदेकान्तस्वरूपतः ॥८६॥

तत्सदेकान्त........ ... ...च्छ्रता ।
आविद्यञ्च परं न स्या .... ॥८७॥

यत्साधकतमं तस्याः तच्च स्यात्तदभेदि वै ।
घटादिस्तत्तमं हीष्टं तदभेदि मृदादिकम् ॥१००॥
न चक्रमित्यभेदित्वमचितिश्चित्त एव हि ।
समितिर्ननु चिद्रूपा न ह्येषा स्यादचिन्मयी ॥१०१॥
किञ्च स्यात् कस्यचिद्ध्वंसो विरुद्धार्थमसौ यथा ।
प्रका·· · ·· · ····· · · ··· ······· ·· ·॥१०२॥
[प्र]मितं चक्षुषेत्यादिप्रयोगस्तूपचारतः ।
प्रमीयते गवाक्षेण खमित्यादिप्रयोगवत् ॥१०३॥
संशयादिधियो नैव सम्यग्ज्ञानत्वसम्भवः ।
तत्त्वे हि तदसम्यक्त्वं नास्त्येव न चार्थतः ॥१०४॥
ततः स्थितं प्रमा· ··· ················ ··· · ।
···· ··· ···· ····णां स्यान्नाचिदादिकमित्यपि ॥१०५॥
तथोपपत्तिरेव स्यादन्यथानुपपन्नता ।
पर्युदासनञर्थत्वादिति कस्याश्च सिद्धिता ॥१०६॥
सम्यग्ज्ञाने प्रमाणे च तज्ज्ञानं ब्रह्मणो यदि ।
स्वतो वित्तिरिति, प्राप्तं प्रागुक्तं तत्र[दूषणम्]॥१०७॥
········ · ······· ···· ···न्नो ब्रह्मणो यदि ।
भवेद् गत्यन्तराभावाद् ब्रह्मैव जीव एव वा ॥१०८॥
ब्रह्मैव चेत् सतो वित्तादुक्तदोषोऽन्य एव चेत् ।
ब्रह्मणो भाव एव स्यादिति स्यात्स्वमतच्युतिः ॥१०९॥
यद्यभेदः कथञ्चित्स्यादविद्या ·· ········ · · ··· ···।
··· ·· · · ·· ·· ··· ······ ····कथम् ॥११०॥
भिन्नः सन्नेव जीवश्चेद् द्वैतमाविद्यरूपकः ।
यद्यसौ ······· ····· ·· ·····ज्ञानसम्भव· ॥१११॥

.... ।

तत्रोक्तं दूषणं नापि प्रत्यक्षादिसदत्ययात् ॥१२४॥

प्रत्यक्षादेः प्रमाणत्वात् ज्ञानत्व हि तथा सति ।
तज्ज्ञान ब्रह्मणो न स्याज्जीवस्याप्युक्तदूषणात् ॥१२५॥

ततो गत्यन्तराभावे वेदात् स्याद् ब्रह्मनिर्णयः ।
आ .... ॥१२६॥

ततो ब्रह्मपरिज्ञानं वेदादुत्पत्तिमिच्छताम् ।
तद्भवेदन्यवाक्यादप्याविद्यकाविशेषतः ॥१२७॥

विशेषस्तत्र चास्त्येव कार्यभेदविलोकनात् ।
न हि मृत्यादिकं कार्यं पथ्यादि(दे)रपि दृश्यते ॥१२८॥

इति चेन्न तु तत्का . . . . ।
... . र्यभेदोऽपि युज्यते ॥१२९॥

आविद्ये शक्तिभेदश्चेत् सत्त्वमेवास्य युज्यते ।
शक्तिव्याप्तं हि सत्त्वं स्यात् तन्नाविद्यस्य शक्तता ॥१३०॥

अशक्तत्वाविशेषेऽपि वेदादाविद्यरूपतः ।
ब्रह्मज्ञानसमुत्पत्तौ साऽन्यवाक्याच्च सम्भवेत् ॥१३१॥

तथा ब्रह्मविदः..... .... ।
....भवतीति श्रुतिः........॥१३२॥

इति ब्रह्मस्वरूपस्य परेषां प्रतिपादकम् ।
व्यर्थं वेदादिशास्त्रं स्यान्न ह्यब्रह्मविदः परे ॥१३३॥

किञ्च ब्रह्मपरिज्ञाने तज्ज्ञाने ब्रह्म वा फलम् ।
यद् ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिः श्रुता ॥१३४॥

ब्रह्मैव यदि . ... ।
. ... रूपेण ति........ .... भवेत् ॥१३५॥

....यं निर्बाधे प्रत्ययत्वतः ।
ब्रह्मवन्न हि तत्सत्त्वे[चा]प्यन्यदनिवन्धनम् ॥१४८॥

इत्यतो भेदसत्त्वे स्याद्भ्रान्तो(न्ता)भेदधीः स्फुटम् ।
ततस्तद्भ्रान्तिविच्छेदोऽप्ययुक्तं ब्रह्मधीः फलम् ॥१४६॥

शुक्तिका रूप्यवन्मिथ्या दृश्यत्वा... . ..   ... ।
. . ..   भावहानितः ॥१५०॥

अन्यथा प्रतिभासत्वात्तद्वद्ब्रह्माप्यसद्भवेत् ।
तद्रूप्ये प्रतिभासत्वं दृश्यत्वमिव हीक्षते ॥१५१॥

निर्बाधप्रतिभासत्वं ब्रह्मणीव परत्र च ।
तन्नास्मादनुमानाच्च तद्धेतोरस्ति वाधनम् ॥१५२॥

.... ।
विश्वभेदो भवेत्तोयतरङ्गेष्विन्दुभेदवत् ॥१५३॥

यथैव तत्तरङ्गेषु चन्द्रश्चन्द्र इति स्फुटम् ।
अभेदेनानुविद्धत्वाच्चन्द्रभेदो मृषा मतः ॥१५४॥

तथा घटादिभेदोऽपि सत्सदित्याद्यभेदतः ।
अनुविद्धो मृषैवे... ... .॥१५५॥

.. .. रित्वं तद्धेतोः स्यान्निरङ्कुशम् ।
हेतु-साध्यादिधीभेदे वास्तवेऽप्यस्य दर्शनात् ॥१५६॥

धीरियं धीरियं चेति तदभेदानुविद्धता ।
तद्धीष्वपि हि दृष्टेति तद्धेतुस्तत्र चेद्यते ॥१५७॥

यद्यवास्तव एवायं तद्धीभेदोऽपि सं.......।
. ...वास्तवम् ॥१५८॥

ततो भेदाऽमृषात्वं च न भवेदेव वास्तवम् ।
न हि हेतोर्मृषात्वे स्यात्तत्कार्यं चापि वास्तवम् ॥१५६॥

· ·· ·च कार्येषु तैरेव व्यभिचारिता ।
तद्भेदासत्त्वसाध्यस्य हेतोः स्यात्सुव्यवस्थिता ॥१७२॥

विद्ययाऽविद्यया चास्य व्यभिचारस्तयोरपि ।
इयं विद्येयमन्येति किं नाभेदानुविद्धता ॥१७३॥

न हि विद्या विभिन्नेयमविद्याऽस्तीति · ···· ।
·················· · ···· ··त् त्तयात्मिका ॥१७४॥

कल्पितो यदि संसारो न तस्य ब्रह्मकल्पकम् ।
अतस्मिंस्तद्ग्रहो भ्रान्तिः कल्पना साऽस्य किं भवेत् ॥१७५॥

प्राच्यतद्रूपसंसारः कल्पकोऽस्यापि तादृशः ।
तस्याप्येवं प्रबन्धोऽयमनादिः सैव संसृतिः ॥१७६॥

इ······ ····································· ·· ···· ।
तद्धेतोर्व्यभिचारित्वं तद्भेदस्तु वास्तवात् ॥१७७॥

तद्भेदेऽपि मृषात्वं चेत्कथं तद्रूपसंसृतिः ।
इत्यादेः पुनरावृत्तेरनवस्था महीयसी ॥१७८॥

विद्यान्तराद्धि विद्याया भेदादिरपि युज्यते ।
अविद्याया··· ·············· · ············ ॥१७९॥

अविद्याया· स्वभावो यो विद्यायाश्च स एव चेत् ।
साऽप्यविद्यैव विद्याया वार्ताऽपि क्वोपलभ्यताम् ॥१८०॥

विद्यायाश्चेत्स्वभावोऽन्यो वास्तवः परिपठ्यते ।
अविद्यातः पृथग्भावः कथमेतन्निषिध्यताम् ॥१८१॥

स्वभाव··· ······ · ·· ··· ··· · ······ ।
भावेषु यस्मात्तन्नेयं चर्चितार्था वचो गतिः ॥१८२॥

ततो वास्तव एवायं भेदो विद्याऽन्ययोस्तथा ।
व्यभिचारश्च तद्धेतोरित्यबाधैव भेदधीः ॥१८३॥

....श्च कार्यं तु न हि कारणम् ।
तथापि तद्द्वय स्यात किं न [हि]सत्त्वादिकं सकृत् ॥५॥
अन्यापोहादभीष्टश्चेद् धर्मभेदस्तथा भवेत् ।
साङ्कर्यं सर्ववस्तूनां नीरूपोऽयं हि सर्वगः ॥६॥
गौश्चेदश्वाद्यपोहात्स्यात ....।[1]

---

[1] मूडबिद्रीयजैनमठग्रन्थालयगत ६०६ संख्याङ्किते ताडपत्रीयग्रन्थे प्रस्तुत'स्याद्वादसिद्धि'ग्रन्थ. पत्रसंख्या २३६तः प्रारभ्य पत्रसंख्या २५६ पर्यन्तमपूर्ण एवोपलभ्यते । तत्र २४६ तः २५३ पर्यन्तं मध्यस्थानि सप्त पत्राणि त्रुटितान्यपि विद्यन्ते ।—सम्पादक ।

परिशिष्ट

परिशिष्ट

१. स्याद्वादमञ्जरीकारिका-प्रतीकानुक्रमणी